International Research Journal of Humanities, Language and Literature ISSN: (2394-1642)
Impact Factor 7.972 Volume 13, Issue 01, Jan 2026
Association of Academic Researchers and Faculties (AARF)
Website-www.aarf.asia, Email : editor@aarf.asia , editoraarf@gmail.com

# वेदाङ्गज्योतिषीयमुहूर्त्तगणनापद्धतिः

**प्रो. विश्वरञ्जनपतिः**
**आचार्यः विद्याशाखाप्रमुखश्च, ज्योतिषविद्याशाखा,**
**केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा**

वेदाङ्गज्योतिषे मुहर्त-होरा-अहोरात्र-पक्ष-मास-ऋत-वर्ष-चान्द्र-सावन-पर्वदिनादीनां विषयाणां पर्यालोचनं कृतमस्ति ।[i] एतेषां सर्वेषां कालावयवानां स्ववैशिष्ट्यकारणेन कालनिर्धारणस्य प्रक्रियायां महत्त्वपूर्णाः सिद्धाः भवन्ति । शुभाशुभकार्याणाम् आरम्भं कर्तुं वेदाङ्गज्योतिषे तिथि वार-नक्षत्र-करण-मुहूर्त्तानाम् उपरि विचारः अत्यन्तं महत्त्वपूर्ण मतमस्ति ।[ii] वैदिकर्षीणामिदं मतमस्ति यत् व्यक्तिः स्वोन्नतिं वाञ्छति सः मुहर्त्तानां शुभाशुभत्वं ज्ञत्वा एवं कार्यस्य आरम्भं कुर्यात् ।[iii] वेदाङ्गज्योतिषस्य ऋक्संस्करणे मुहर्त्तस्य वर्णनं कृतम् ।[iv] अत्र ज्ञापितमस्ति यत् एकस्मिन् दिवसे ३० मुहर्त्ताः भवन्ति ।[v] दक्षिणायनस्यापि च उत्तरायणस्य प्रसङ्गेऽपि मुहूर्त्तशब्दः प्रयुक्तोऽस्ति अपि च अत्र उक्तं यत् दिनस्य तथा च रात्रेः माने अधिकतममानां षण्मुहर्त्तानां वृद्धिः अथवा ह्रासः भवितुं शक्नोति ।[vi] वेदाङ्गज्योतिषस्य याजुषसंस्करणेऽपि एकस्मिन् दिने मुहर्त्तानां संख्यायाः विषये ऋक्ज्योतिषस्य सिद्धान्तानामेव अनुसरणं कृतम् ।[vii] दिनमानसाधनप्रसङ्गेऽपि दिनस्य मुहर्त्तात्मकमान-साधनस्य विधिः ज्ञापितः अस्ति ।[viii] परञ्च इदमवश्यमस्ति यत् एतेषां मुहूर्तानां नामकरणस्य वर्णनं न तु ऋक्ज्योतिषे प्राप्यते एवञ्च नैव याजुषज्योतिषे । वेदाङ्गज्योतिषस्य आथर्वणसंस्करणम् अनया दृष्ट्या बहुसमृद्धमस्ति । अत्र मुहूर्त्तविषये गहनचर्चा प्राप्यते । ग्रन्थस्य प्रारम्भे एव कश्यपऋषिणा ब्रह्मणः मुहूर्त्तस्य विषयेऽप्रच्छत् ।[ix] अस्मिन् ग्रन्थे मुहूर्त्तस्य मानं ज्ञापयन् उक्तं यत् त्रिंशत् त्रुटीनाम् एकः मुहूर्त्तः भवति ।[x] एते पञ्चदशमुहूर्ताः दिवसे तथा च रात्रौ भिन्नाः । अर्थात् संख्यासु आहत्य त्रिंशत् भवन्ति।[xi] दिने मुहूर्त्तज्ञापनस्य एकस्य विधेः उल्लेखः अस्मिन् ग्रन्थे कृतोऽस्ति । एतस्यानुसारं द्वादशाङ्गुलप्रमाणयुक्तस्य काष्ठदण्डस्य छायाद्वारा मुहूर्तानां ज्ञानं कर्तुं शक्यते। [xii]

एतस्य दण्डस्य छायायाः प्रमाणाधारेणैव रौद्रः[xiii], श्वेतः[xiv], मैत्रः[xv], सुसारभटः[xvi] सावित्रः[xvii], विश्वावसुः[xviii], अभिजित्[xix], रोहिणः[xx], बलम्[xxi], विजयः[xxii], नैर्ऋतः[xxiii], वारुणः[xxiv], सौम्यः[xxv] तथा च भगः[xxvi] एतानि मुहूर्त्तानि कथितानि सन्ति । स्पष्टं यत् पूर्वाह्णकाले सूर्यस्य छाया पश्चिमदिशां प्रति भवति अपि च अपराह्णकाले सूर्यस्य छाया पूर्वदिशं प्रति भवति । इयं छाया अधिकतमं ९६ अङ्गुलपरिमिता भवितुं शक्यते । यदि इयं पूर्वं प्रति भवेत्तर्हि भगमुहूर्त्तं[xxvii] तथा च पश्चिमं प्रति भवेत्तर्हि रौद्रमुहूर्त्तं[xxviii] भवति । मुहूर्त्तस्य स्पष्टीकरणं छायाप्रमाणानुसारम् अधोलिखितालिकाद्वारा क्रियते ।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

छायाप्रमाणेषु आधारितमुहूर्त्तैः सह एव एतैः मुहूर्त्तैः सम्बद्धाः कृत्याकृत्याः विचाराः अस्य ग्रन्यास्य वैशिष्ट्यमस्ति ।[xxix] रौद्रनाम्नि प्रथमे मुहूर्त्ते नियमपूर्वकं मारणादीनि भयङ्करकर्माणि कर्तव्यानि भवन्ति ।[xxx] नवीनवस्त्रधारणम्, स्नानम्, ग्रामवासः, उद्यानरोपणम्, कृषिकार्यस्य आरम्भः तथा च इतोऽपि अधिकं चिन्तितानि कार्याणि श्वेतमुहूर्त्ते कर्तव्यानि भवन्ति इति उक्तम् ।[xxxi] मैत्रसंज्ञके मुहूर्त्ते मैत्रीसम्बद्धानि अपि च मित्रसम्बद्धानि कार्याणि तथा च सन्धिप्रभृतीनि कार्याणि निश्चयेन कर्तव्यानि भवन्ति ।[xxxii] अभिचारिकाः प्रयोगाः मित्राणां कल्याणाय तथा च शत्रुणां विनाशाय सारभट्टमुहूर्त्तं प्रशस्तं मतमस्ति ।[xxxiii]सवित्रमुहूर्त्ते देवकार्यम्, यज्ञः, चूडा, यज्ञोपवीतमपि च विवाहप्रभृतीनां कृते उत्तमम् उक्तमस्ति ।[xxxiv] राजा पराक्रमस्य आरम्भः, कवचधारणम्, वस्त्रदानम् एवञ्च शस्त्रकर्मादीनि वैराजमुहूर्त्ते कर्तव्यानि भवन्ति ।[xxxv] विश्वावसुनाम्नि मुहूर्त्ते सर्वप्रकारकाणां सिद्धिप्रदानां कार्याणाम् आरम्भः तथा च इदं ब्राह्मण-क्षत्रिय-वैश्य-द्विजातीनां स्वाध्यायाय प्रशस्तमुक्तमस्ति ।[xxxvi] अभिजित्मुहूर्त्त-मत्यन्तं श्रेष्ठं मतम्। एवञ्च कथितं यत् ब्राह्मण-क्षत्रिय - वैश्य-शूद्र-वर्णानां कृते मुहूर्त्तमिदं प्रशंसनीयम् ।[xxxvii] अस्मिन् मुहूर्त्ते सर्वप्रकारकाः कामनाः, अर्थसाधनम्, अर्थसञ्चयः तथा च यात्रादीनि कार्याणि कर्तुं शक्यन्ते ।[xxxviii] रोहिणमुहूर्त्ते रोपिताः वृक्षाः बिल्वादयः पदपाः निरोगफलैः तथा च पुष्पैः युक्ताः भवन्ति ।[xxxix] बलमुहर्त्ते राजाद्वारा स्वयम् आरूढो भूत्वा सेनायाः आक्रमणाय सज्जीकरणं तथा च शत्रूणामुपरि विजयप्राप्तये प्रस्थानम् इत्यादीनि कार्याणि श्रेष्ठानि सन्ति ।[xl] प्रयाणम्, शान्तिः, स्वस्तिपाठः इत्यादिकार्याणां कृते विजयमुहूर्त्तं प्रशंसितस्ति ।[xli] शत्रुसेनायाः नाशः शत्रुदेशस्य विनाशः, आक्रमणम्, सम्पत्तिग्रहणं तथा च शत्रूणां विनाशः इत्येतेषां कार्याणां कृते नैऋतमुहूर्त्तम् अत्यन्तं श्रेष्ठमुक्तम् ।[xlii] वारुणमुहूर्त्तं कृषिकर्मणे अर्थात् गोधूमः, यवाः, धान्यम्, चणकाः तथा कमलस्य वपनदृष्टया प्रशस्तं मतमस्ति ।[xliii] समस्तानि शुभकार्याणि सौम्यमुहूर्त्ते करणीयानि भवन्ति ।[xliv] भगमुहूर्त्तं बलवत् अपि च पराक्रमयुक्तं मतमस्ति तथा च अस्मिन् कालावधौ नारीणां विशेषेण कुमारीणां विवाहसम्बद्धाः सौभाग्यकारकाः संस्काराः सम्पादनीयाः ।[xlv] दिनस्य अन्तिममुहूर्त्ते अर्थात् भगे कन्यायाः वरणं श्रेष्ठं भवति । यतो हि अस्मिन् मुहूर्त्ते परिणिता कन्या पतिं विहाय अन्यत्र कुत्रापि न गच्छति ।[xlvi] एतेषां मुहूर्त्तानां वर्णनादनन्तरम् उक्तमस्ति यत् शुभमुहूर्त्ते कार्यसम्पादने लाभप्राप्तिः[xlvii] तथा च कार्यस्य सिद्धिः भवति ।[xlviii]

---

**[i] इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणाम् ।**
**दिनर्वयनमासानां व्याख्यानं लगधोऽब्रवीत् ।। याजुष्. ज्यो. ४३**
**[ii] करणे कार्यनिष्पत्तिः मुहूर्ते लाभमादिशेत् ।**
**चतुर्भिः कारयेत् कर्म सिद्धि हेतोर्विचक्षणः ।। आथर्वण ज्यो- ८२**
**[iii] पृथक् पुरुषविज्ञेयं नक्षत्राणां शुभाशुभम् ।**
**आत्म सम्पत् करं ज्ञेयमात्मानमृद्धिमिच्छताम् ।। तत्रैव १०२**
**[iv] धर्मवृद्धिरपां प्रस्थः क्षपा ह्रास उदग्गतौ ।**
**दक्षिणेतौ विपर्यासः षण्मुहूर्त्ययनेन तु ।। ऋक्.ज्यो. ७**
**[v] कला दश च विंशा स्थाद् द्वेहै मुहूर्त्तस्य पाडिके ।**
**तत्त्रिंशद् कलानां तु षट्शती व्यधिका भवेत् ।। ऋकू. ज्यो. १६**
**[vi] तत्रैव**

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

[vii] कला दश सविंशा स्वाद् द्वे मुहूर्त्तस्य नाडिके ।
तन्त्रिशद् द्युकलानां तु षट्शती त्र्यधिका भवेत् ।। याजुष्. ज्यो. ३८
[viii] यदुत्तरस्यायनतो गतं स्याच्छेषं तथा दक्षिणतोऽयनस्य ।
तदेकषष्ट्या द्विगुणं विभक्तं सद्वादशं स्याद् दिवसप्रमाणम् ।। तत्रैव ४०
[ix] किं प्रमाणं मुहूर्तानां रात्रौ वा यदि वा दिवा ।
चन्द्रादित्य गतं संर्वं, तन्मे प्रब्रूहि पृच्छतः ।। आथर्वण. ज्यो. २
[x] जुटीनां तु भवेत् त्रिंशन्मुहूर्तस्य प्रयोजनम् ।
द्वादशांगुलमुक्षेपं तस्य छाया प्रमाणतः ।। आथर्वण. ज्यो. ५
[xi]एते मुहूर्ता व्याख्याता दशद्वौच तथा त्रयः ।
अहन्येव तु विज्ञेया रात्रावपि न संशयः ।। तत्रैव ११
[xii] आथर्वण. ज्यो. ५
[xiii] नवति षडङ्गुलाश्चैव प्रतीचीं तां प्रकाशयेत् ।
पुरस्तात् सन्धिवेलायां मुहूर्ती रौद्र उच्यते ।। आथर्वण. ज्यो. ६
[xiv] श्वेतः षष्टिः समाख्यातो मैत्रावै द्वादशाङ्गुलः ।
षट् सुसारभटोज्ञेयः सावित्रः पञ्चसुस्मृतः । आथर्वण. ज्यो. ७
[xv] तत्रैव
[xvi] तत्रैव
[xvii] चतुर्षु चैव वैराजस्त्रिषु विश्वावसुस्तथा ।
मध्याह्ले चाभिजिन्नाम यस्मिन् छाया प्रतिष्ठति ।। आथर्वण. ज्यो. ८
[xviii] तत्रैव
[xix]तत्रैव
[xx] प्राचीं वैगामिनीं छायां रौहिणस्त्रिषु वर्तते ।
बलश्चतुर्षु विख्यातो विजयः पञ्चसु स्मृतः ।। आथर्वण. ज्यो. ९
[xxi]तत्रैव
[xxii] आथर्वण. ज्यो. ९
[xxiii] नैर्ऋस्तु षडङ्गल्यो वारुणो द्वादशाङ्गलः ।
स्मौम्यः षष्ठिः समाख्यातो भगस्तु परमस्तथा ।। आथर्वण ज्यो १०
[xxiv] तत्रैव
[xxv] तत्रैव
[xxvi] आथर्वण ज्यो १०
[xxvii] नैर्ऋस्तु षडङ्गल्यो वारुणो द्वादशाङ्गलः ।
स्मौम्यः षष्ठिः समाख्यातो भगस्तु परमस्तथा ।। आथर्वण ज्यो १०
[xxviii] नवति षडङ्गुलाश्चैव प्रतीचीं तां प्रकाशयेत् ।
पुरस्तात् सन्धिवेलायां मुहूर्ती रौद्र उच्यते ।। आथर्वण. ज्यो. ६
[xxix] अत ऊर्ध्व तु सर्वेषामानुपूर्व्याच्छभाशुभम् ।
सर्व विस्तरशस्ताँच तन्मे निगदितः शृणु ।। आथर्वण. ज्यो. १२
[xxx] रौद्रे रौद्राणि कुर्वीत रुद्र कार्याणि नित्यशः ।

यच्चरौद्रं भवेत् किञ्चित् सर्वमेतेन कारयेत् ।। आथर्वण. ज्यो. १०

[xxxi] श्वेते वासश्च स्नानं च ग्रामोद्यानं तथा कृषिः ।
आरम्भाश्चात्रसिद्ध्यन्ति ये चार्थाश्चिन्तिताः क्वचित् ।। आथर्वण. ज्यो. १४

[xxxii]मैत्रे मैत्राणी कुर्वीत मित्रकार्याणि नित्यशः ।
पञ्चमैत्रं भवेत् किञ्चित् सर्वमतेन कारयेत् ।। आथर्वण. ज्यो. १५

[xxxiii] अभिचारं तु शत्रूणां कुर्यात् सारभटेन तु ।
आत्मार्थे सुहृदर्थे वा नश्यन्ते तस्य शत्रवः ।। तत्रैव १६

[xxxiv] सावित्रेण मुहूर्तेन देवकार्याणि कारयेत् ।
यज्ञान्विवाहानु द्वाहांश्चूडोपनयनानि च ।। तत्रैव - १७

[xxxv] वैराजेन मुहूर्तेन राजापौरुषमारभेत् ।
वर्माणि पटदानानि शस्त्रकर्म च कारयेत् ।। तत्रैव - १८

[xxxvi] विश्वावसौ तु सर्वार्थानारम्भश्चात्र कारयेत् ।
सर्वेषां च द्विजातीनां स्वाध्यायेऽत्र प्रशस्यते ।। आथर्वण. ज्यो. १९

[xxxvii] ब्रह्म क्षत्रिय वैश्यानां शूद्राणां चापि नित्यशः ।
सर्वेषामेव वर्णानां योगो मध्यं दिनेऽभिजित् ।। आथर्वण. ज्यो. २०

[xxxviii]अभिजित्सर्वकामाय सर्वकामार्थसाधनः ।
अर्थसञ्चय मानानामध्वानं गन्तुमिच्छताम् ।। आथर्वण. ज्यो. २१

[xxxix]रौहिणेवापिता वृक्षा बिल्व गुल्म लतास्तथा ।
अरोगाः पुष्पवन्तश्च फलवन्तश्च नित्यशः ।। आथर्वण. ज्यो. २२

[xl] बलेन तु बलं राजा स्वयमारुह्य योजयेत् ।
योगः सम्पत्तितं कार्यं शत्रूश्च विषमेजयेत् ।। तत्रैव - २३

[xli]विजयेन प्रयातस्य विजयो नात्र संशयः ।
मगलान्यत्र कुर्वीत शान्ति स्वस्त्ययनानि च ।। तत्रैव - २४

[xlii]नैर्ऋते घातयेत्सेनां परराष्ट्र तु मर्दयेत् ।
कर्तुः सम्पत्करो ह्येषः सर्व शत्रु निवर्हणः ।। आथर्वण. ज्यो. २५

[xliii] वारुणेन मुहूर्तेन वारुणानि प्रवापयेत् ।
गोधूमान्यव शालींश्च चणकांश्चोत्पलानि च ।। आथर्वण. ज्यो. २६

[xliv] सौम्ये सौम्यानि कुर्वीत सौम्य कार्याणि नित्यशः ।
यच्च सौम्यं भवेत्किञ्चित् सर्वमेतेन कारयेत् ।। आथर्वण. ज्यो. २७

[xlv] सर्वासामिह नारीणां कन्यानां च विशेषतः ।
सौभाग्यानि प्रयुञ्जीत भगे भीमे पराक्रमे ।। आथर्वण. ज्यो. २८

[xlvi] भगेन वरयेत्कन्यां ब्राह्मणीं कुलवर्धिनीम् ।
भगेन वरिता कन्या नैव सान्यत्र गच्छति ।। आथर्वण. ज्यो. २९

[xlvii] करणे कार्यनिष्पत्तिः मुहूर्ते लाभमादिशेत् ।। आथर्वण. ज्यो. ८२

[xlviii] मुहूर्त्तेन कृतं कर्म सिद्ध्यते नात्र संशयः ।
दूरस्थस्य मुहूर्त्तस्य क्रिया च त्वरिता यदि ।। आथर्वण ज्यो. ८६

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.